International Journal of Sanskrit Research 2017; 3(1): 146-147

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(1): 146-147
© 2017 IJSR
www.anantaajournal.com
Received: 13-11-2016
Accepted: 15-12-2016

**डॉ० उपेन्द्र साहु**
एकहरि, लदनियाँ, मधुबनी, बिहार, भारत

**Corresponding Author:**
**डॉ० उपेन्द्र साहु**
एकहरि, लदनियाँ, मधुबनी, बिहार, भारत

# भारतीय सांस्कृतिक निधीनां रक्षणार्थं साहित्यं धर्मशास्त्रञ्चाध्येयम्

**डॉ० उपेन्द्र साहु**

**सारांशः**
भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कतिस्तथा इत्यनेन ज्ञाययते यदस्माभिः संस्कृतभाषा शास्त्रञ्च रक्षणीयाः। भारतीयसांस्कृतिकनिधीनां रक्षणार्थं साहित्यशास्त्रस्य धर्मशास्त्रस्य चाध्ययनं लोकोपकारकत्वादावश्यकं विद्यते।

भारतीय–संस्कृति–परिज्ञानं संस्कृतज्ञानाधीनम्। यतो हि संस्कृते एव संस्कृतिस्वरूपं समुल्लिखितं विद्यते। सांस्कृतिकनिधयश्च संस्कृते एव सुरक्षिताः सन्ति। अतस्तज्ज्ञानार्थं संस्कृताध्ययनं नितान्तमावश्यकम्। स्वकीया संस्कृतिर्यदि सुज्ञाता न स्यात् परिरक्षिता च न भवेत् तर्हि मानव–जीवनस्य सुसासफल्यं न स्यात्। अतः भारतीय–संस्कृति–परिज्ञानार्थं सांस्कृतिक–निधीना×च परिरक्षणार्थम् अधुनापि संस्कृताध्ययनमावश्यकम्।

संस्कृतस्य भाषागतमपूर्वं वैशिष्ट्यम् – विश्वस्मिन् अतिप्राचीना सुसमृद्धतमा इयं सुरभारती। अस्यां किमपि एतादृशं वैशिष्ट्यं वरीवर्ति यन्मध्यकालीनभाषासु इदानीन्तनीषु च योगात्मिकासु भाषासु नोपलभ्यते। समस्तासमस्तपदरूपेण विषयानुकूल– सरलासरल–पदजातरूपेण च वर्णनक्षमत्वम्, सन्धि– समास द्वारा चमत्कार–जनकत्वम्, वैदर्भी–पा×चाली–गौडीरूपासु तिसृष्वपि रीतिषु रसानुकूल–रचनायोग्यत्वम्, माधुर्यौजःप्रसादाख्यानं त्रयाणामपि गुणानामभिव्य×जकत्वम्, विविधप्रत्यय– मालाधारित्वम्, ध्वन्यनुरूपवर्णमालाशालित्वम्, भावानुकूल– विलक्षण– शब्द– साम्राज्य×च यादृशं संस्कृतभाषायां वरीवर्ति न तादृशं विश्वस्मिन् कस्यामपि अन्यस्यां भाषायाम्। कम्प्यूटरविज्ञानस्य कृते संस्कृतं परमापयोगी।[1]

इदमेव च कारणं विद्यते येन संस्कृतोद्भवाः पालिप्राकृतादिभाषाः संस्कृतापेक्षया नवीना अपि जनसमाजस्य न तथा सन्निकटाः सन्ति यथा संस्कृतभाषा। पालि–प्राकृत–भाषा–परिज्ञानार्थं साधारणतया तस्याः संस्कृतरूपान्तरमपेक्ष्यते। अतः एवंविधवैशिष्ट्ययुता भाषा आपामरजनव्यापिनी यथा स्यात् तथा समुद्योगः करणीयः।

संस्कृत–भाषाया आधुनिक–भारतीय–भाषाणां मातृत्वम् –उत्तरभारतीयभाषाणां सर्वासां मूलं संस्कृतमेवेति विदन्त्येव विपश्चितः। दक्षिण–भारतीय–भाषाणाम् साहित्यस्य समृद्धये संस्कृतभाषायाः शब्दावली विचार–सरणिः वर्णन–पद्धतिश्च परिगृहीतास्तत्र तत्र विलसन्ति, तत्साहित्य–विवृद्धिं च कुर्वन्ति। तत्र मलयालमभाषायाम् संस्कृत अशीतिः शब्दाः प्रतिशतं परिगृहीताः सन्ति, कर्णाटकभाषायां षष्ठिः शब्दाः, तेलगूभाषायां प×चाशत् शब्दाः, द्रविडभाषायां त्रिंशच्छब्दाः गृहीताः सन्तीति भाषा–सर्वेक्षण–काराः समामनन्ति।[2] अतः संस्कृतभाषैव उत्तर–भारतीयभाषाणां जन्मदात्रीत्वेन दक्षिण–भारतीय–भाषाणां धात्रीत्वेन च जननीति नास्त्यत्र शङ्कावसरः प्रज्ञावताम्। मातरि सुसमृद्धायामेव सत्याम् दुहितरः सन्तुष्टा विराजन्ते। अतोऽपि हेतोः संस्कृतस्य समृद्धिः सर्वथा काम्या वर्तते।

पुरातने काले बृहत्तरभारते मलयद्वीप– वारुणद्वीप– सुवर्णद्वीप– यवद्वीप– चम्पा– कम्बोजादिषु संस्कृतमेव सम्पर्क–भाषा, भारतीय–संस्कृतेः सन्देश–वाहिका, निगमागम–दर्शन–प्रचारिका च यथा आसीत् तथैव अधुनापि संस्कृत–भाषाया भाव्यम्।

विश्वस्मिन् साहित्य–संस्कृति– विषये वैभिन्ये विद्यमानेऽपि तत्र काम्यैकत्वस्य संस्थापनार्थम् तथा भारोपीय–साहित्यस्य विश्व–साहित्यस्य च रचनार्थम्, संस्कृतमेव केवलं समुपकारकं स्यात्। संस्कृतज्ञानमासाद्यैव पाश्चात्य–विद्वांशः तुलनात्मक–भाषा–विज्ञानस्य, तुलनात्मक–धर्मस्य, तुलनात्मक–पुराण–कथा–साहित्यस्य च रचनां कृतवन्तः।[3] अतः संस्कृतस्य विश्वस्मिन् प्रचार आवश्यकः।

भारतस्य समुन्नतये राष्ट्रिय–भावनाया आवश्यकत्वमस्ति। प्रादेशिक–भावना देशं राष्ट्रं च वियुनक्ति। राष्ट्रिय–भावना च राष्ट्रं संयुनक्ति। विच्छिन्नो देशः परस्परं द्वेष्टि, दौर्बल्य×चाधिगच्छति। सङ्घीभूतो देशः परस्परं मित्रति, शक्तिमत्त्व×चावाप्नोति। प्राकृतादि भाषाणां प्रादेशिकत्वम्, यच्च महाराष्ट्री, शौरसेनी, मागधीत्यादि नामभिः आधुनिक–भारतीय–भाषा–नामभिश्च संसूच्यते।

संस्कृत–भाषा हि सम्पूर्णराष्ट्रस्य न कस्यचित् प्रदेश–विशेषस्य। अतः एतद्द्वारा राष्ट्रिय–भावनायाः समुद्घोषो भवति। अतो राष्ट्रस्य कल्याणार्थं संस्कृतस्य अध्ययनमावश्यकम्। संस्कृताध्ययनेन राष्ट्रियैकतायाः सुदृढीकरणं जायते। सुदृढमेव राष्ट्रं समुन्नतं भवति। संस्कृताध्ययनेन अध्येतृणां स्वेषु सम्मानभावः –अन्त्यजो वा हरिजनो वा आदिवासी वा मोहम्मदमतानुयायी वा यो वा को वा संस्कृतमधीते सुसंस्कृतः सन् स्वात्मानं समाजे सम्मानभाजं मनुते। संस्कृते एतादृशं वैलक्षण्यं विद्यते येन इदं स्वाध्येतारं सम्मानशालिनं विद्यते इति जानते सर्वे जात्या निम्ना अपि संस्कृतज्ञाः। संस्कृतं हि स्वसम्पर्किणं संस्कृतं ध्रुवं करोत्येव।[4] अतः आधिभौतिकदृष्ट्या दीना अपि संस्कृताध्ययनेन आध्यात्मिक–बलेन अदीना भवन्तु इति हेतोः संस्कृतमध्येतव्यमेव।

**निष्कर्षः**

संस्कृतं न केवलमैहिकसिद्धिसम्पादकम्, न केवलमिदं लौकिकप्रेयःसाधनम् अपि तु पारलौकिक–सिद्धेरपि साधकम्, पारमार्थिकश्रेयसामपि प्रदायकम्। प्रेयः श्रेयसोः प्राप्तौ सत्यामेव मानव–जीवनस्य साफल्यम्। ससम्मानासन–ग्रहणपूर्वक–ताम्बूलद्वय–प्राप्तौ ऐहलौकिकजीवनस्य साफल्यम् आत्मप्रमोदार्णवावगाहने पारमार्थिकजीवनस्य साफल्यमिति सर्वतन्त्र–सिद्धान्तः। उभयोः प्रापिका लोकद्वय–साधनी चतुरता एव वास्तविकी चतुरता। संस्कृताध्ययनेनैव एतत्साफल्यद्वयमिति संस्कृताध्ययनम् परमावश्यकम्।

**सन्दर्भाः**


1. संस्कृतं विज्ञानञ्च, पृष्ठसंख्या–102 ।
2. संस्कृतसाहित्येतिहासः, पृष्ठसंख्या– 10 ।
3. तत्रैव, पृष्ठसंख्या– 76।
4. शोधप्रबन्धः, पृष्ठसंख्या– 65 ।
5. वैदिकवाङ्. मयस्येतिहासः, पृष्ठसंख्या– 22 ।